दिनाङ्कः-09.12.2025

प्रातः - 06:55

<u>लोकसभा वंदे मातरम्</u>

प्रधानमन्त्री श्रीनरेन्द्र-मोदी उक्तवान्, यद् भारतम्, प्रत्येकं आव्हानं अतितर्तुं क्षमतां स्थापयति, अथ वंदे मातरम् इत्यस्य गीतस्य भावना एव देशाय तद्बलं ददाति। सः अवदत्, यद् वन्दे मातरम् केवलं गीतं वा स्तोत्रं वा नास्ति, अपि तु जनान् स्वकर्तव्यं प्रति जागरणस्य प्रेरणास्रोतः अस्ति । आत्मनिर्भर-भारतस्य स्वप्नं साकारताम् जनानाम् कृते वन्देमातरम् प्रेरणारूपेण तिष्ठति इति सः रेखांकितवान् । प्रधानमन्त्रिणा ह्यः लोकसभायां, राष्ट्रियगीतस्य, वन्देमातरम् इत्यस्य, पञ्चाशदुत्तर-एकशत-तमस्य, वार्षिकोत्सवस्य, चर्चायाः अवसरे एतत् उक्तम् । इदम् राष्ट्रगीतं, बङ्किम-चन्द्र-चट्टोपाध्यायेन अष्टादश-शताब्दस्य सप्त-पञ्चाशत् तमे वर्षे लिखितम् वर्तते।

चर्चायाः आरम्भं कुर्वन् श्रीमोदी अवदत् यत् वन्देमातरम इत्यस्य मन्त्रः, सम्पूर्णदेशाय, शक्तिं प्रेरणां च अयच्छत्, अनेन स्वतन्त्रता-आन्दोलनं ऊर्जया परिपूरितम् ।

लोकसभा अध्यक्षेन ओम बिर्ला-वर्येण उक्तं, यत् अस्याम् चर्चायाम् आहत्य षड्षष्टिः सदस्याः भागं गृहीतवन्तः । सः अवदत् यत् सदनस्य सर्वे सदस्याः अर्धरात्रिं यावत् वंदेमातरम् गीतस्य विषये चर्चां कर्तुं कथं एकत्रिताः अभवन् इति सम्पूर्णः देशः साक्षीभूतः अभवत् । सः आशां प्रकटितवान् यत् सदने एतादृशाः रचनात्मकाः चर्चाः निरन्तरं भविष्यन्ति ।

<u>पुनः संशो. राज्यसभा स्वास्थ्य सुरक्षा विधेयक</u>

संसदा स्वास्थ्य-सुरक्षया राष्ट्रिय-सुरक्षा उपकर-विधेयकः विंशतिः-पञ्चविंशतिः इत्यस्य अंगीकारः कृतः। अवधेयं यत्, अस्मिन् विधेयके, केन्द्रसर्वकारेण अधिसूचितस्य, पानमसाला इति ताम्बूल-सामग्र्याः उपरि, अन्य-वस्तूनाम् उत्पादनस्य च उपरि उपकरम्, आरोपयितुं प्रस्तावः अस्ति । उपकरेण प्राप्तं धनं जनस्वास्थ्यस्य, राष्ट्रिय-सुरक्षायाः च कृते उपयुज्यते ।

<u>राष्ट्रपति द्रौपदी मुर्मू हस्तशिल्प</u>

राष्ट्रपति पदासीना द्रौपदी मुर्मूः अद्य नवदिल्ल्यां द्विसहस्राब्दस्य त्रयोविंशति-चतुर्विंशति वर्षस्य विशिष्टानां निपुण-शिल्पिनां सम्मानं कृत्वा, हस्त-शिल्पपुरस्कारान् प्रदास्यति। वस्त्रमन्त्रालयेन विज्ञप्तौ उक्तं, यत् एताः प्रतिष्ठिताः राष्ट्रिय-पुरस्काराः असाधारण-कला-प्रवीणतायाः उत्सवं कुर्वन्ति तथा च भारतस्य समृद्ध-विविध-हस्तशिल्प-परम्परायाः संरक्षणाय, प्रचाराय च सर्वकारस्य प्रतिबद्धतां रेखांकयन्ति ।

## नायडु - डीडी न्यूज एक्सक्लूसिव

नागरिक-विमानन-मन्त्री श्रीराम-मोहन-नायडुः अवदत् यत् अद्यतनीय-विमानयान-संकटस्य कृते इण्डिगो एकमात्रं उत्तरदायी अस्ति, एवं इण्डिगो-संस्था स्वकर्तव्येषु असफला अभवत्। डीडी न्यूज इति वार्तामाध्यमस्य विशेष-वार्तालापे वदन् श्रीनायडुः अवदत् यत् इण्डिगो इत्यस्य दुर्व्यवस्थापनं अद्यतनीय-विमानयान-अवरोधस्य विलम्बस्य च कारणम् अस्ति ।

## DGCA-इण्डिगो प्रतिक्रिया

इण्डिगो एयरलाइन्स् इत्यनेन नागरिक-विमानन-महानिदेशालयस्य कारण-प्रदर्शन-सूचनायाः प्रतिक्रिया दत्ता। इण्डिगो इत्यनेन स्थितिः अत्यन्तं असुविधा-जनकः इति वर्णयित्वा स्वग्राहकानाम् असुविधायाः, कष्टस्य च क्षमायाचना कृता ।

## विमानन सचिव-इण्डिगो

तन्मध्ये नागरिक-विमान-मन्त्रालयस्य सचिवः समीर-कुमार-सिन्हा इत्यनेन उक्तं यत् अधुना विमानयान-सेवाः प्रायः सामान्यतां प्राप्ताः सन्ति। सः अवदत् यत् इण्डिगो इत्यनेन ह्यः अष्टादश-शताधिकानि विमानयानानि प्रचालितानि, यद्धि तुलनायाम्, सामान्य-सञ्चालनस्य समीपे अस्ति ।

## क्रिकेट्

क्रिकेट्-क्रीडायाम्, एकदिवसीय-क्रीडा-त्रय-श्रंखलायाम्, द्वे-एकम् इति अंकानां अन्तरालेन दक्षिण-आफ्रिकादलं विरुद्ध्य, विजयं प्राप्तवता, भारत-दलेन, अद्य आरभ्यमाण-पञ्च-क्रीडा-टी-२०-इति विंशतिम्-प्रतिविंशतिः अन्ताराष्ट्रिय-क्रिकेट्-श्रृङ्खलायाः प्रथम-क्रीडाद्वन्द्वे कटक्-नगरस्य बाराबती-क्रीडाङ्गणे दक्षिण-आफ्रिका-दलं विरुद्ध्य क्रीडिष्यते । भारतीय-मानक-समयानुसारम्, सायं सप्त-वादने क्रीडाद्वन्द्वम् आरप्स्यते । अस्याः महत्त्वपूर्ण-श्रृङ्खलायाः कृते सूर्यकुमारयादवः दलस्य नेतृत्वं करिष्यति